विंशः पाठः

# विदिशा

संस्कृतसाहित्ये पत्रलेखनपरम्परा पूर्वकालादद्यप्रभृति सशक्ता संवर्द्धमाना च विद्यते। पत्रमाध्यमेनैव स्वीयान् मनोगतान् हार्दभावान् प्रकटयति पत्रप्रेषकः । मुख्यान् विषयानत्र सङ्क्षेपीकृत्यैव प्रस्तूयते । विषयानुरूपमेव उपक्रमोपसंहारौ विलिख्येते । प्रस्तुतेऽस्मिन् पत्रे विदिशायाः सांस्कृतिकमैतिहासिकञ्च वैशिष्ट्यं वर्णितमस्ति।

शासकीय-उच्चतरमाध्यमिकविद्यालयः

सिंगरौलीनगरम् (मध्यप्रदेशः)

31-01-2008

पूज्यपादाः पितृचरणाः !

सश्रद्धमभिवादये !!

अत्र कुशलं तत्राऽस्तु । पितृवर्य ! विदितं स्यादिदं यत् मम स्वाध्यायः सम्प्रति सुष्ठुतया प्रचलति । विगते सप्ताहेऽस्माकं विद्यालयस्य शैक्षणिकं भ्रमणदलं विदिशानगरीं गतवानासीदिति । तेन दलेन सह अहमपि तत्रागच्छम्।

मध्यप्रदेशस्थनगरीयं पौराणिकी ऐतिहासिकी च वर्तते । विदिशा पूर्वस्मिन् काले 'भेलसा' इति नाम्ना सुविख्याता आसीत् । एतस्य कारणं सूर्यदेवतायाः मन्दिरस्य 'भेल्लस्वामिनः' इति लोकख्यातिरेव । पुरा विदिशानगरी समुन्नतमेकं वाणिज्यिकं केन्द्रमासीत् । योगदर्शनस्य प्रणेता व्याकरणमहाभाष्यस्य कर्ता महर्षिः पतञ्जलिः सम्राट् अशोकोऽपि विदिशया सह सम्बद्धौ आस्ताम् ।

पौराणिकी कथानुरूपं हैहयवंशीयाः राजानो अत्र राज्यं प्रकुर्वन्ति स्म । आदिकविना वाल्मीकिना प्रणीतेन रामायणेन विज्ञायते यत् त्रेतायुगे शत्रुघ्नेन स्वकीयं पुत्रं 'सुबाहु' नामानम् अत्रत्यः शासकरूपेणाभिषिच्य प्रदेशममुं स्वायत्तीकृतमासीत् । कविकुलगुरुः कालिदासः गीतिकाव्ये मेघदूते पूर्वमेघे नगरीमिमां दशार्णदेशस्य राजधानीत्वेन अवर्णयत् ।

सर्वप्रथमं वयं सर्वे पुरातत्त्वसङ्ग्रहालयं द्रष्टुमगच्छाम । तत्र कलात्मिकानां पाषाणप्रतिमानाम् अद्वितीयः सङ्ग्रहो विद्यते । 'बेसनगरम' इत्याख्यस्य स्थलस्योत्खनने समुपलब्धाऽपि सामग्री वर्ततेऽत्रैव । अत्र यक्षस्य, ग्यारसपुरस्य शालभञ्जिकायाः सदाशिवस्य (त्रिमुखिनः शिवस्य) चाप्रतिमाः प्रतिमाः सङ्ग्रहीताः सन्ति । नगर्याः मध्ये 'लोहाङ्गी' स्मारको विद्यते । अत्र संरक्षितः शुङ्गकालीनः शीर्षस्तम्भस्यावशेषः कलात्मकदृष्ट्या अपूर्वः ।

अस्याः उत्तरपश्चिमदिशि दुर्गाभ्यन्तरे स्थितमस्ति 'बीजामण्डलम्' । चर्चिकादेव्याः मन्दिरमिदं विजयदेव्याः अपराभिधेयेन विजयमन्दिरमिति नाम्ना लोके प्रसिद्धिमगात् ।

वेत्रवत्याः वामतटे क्रोशमेकं दूरं वर्तते 'हेलिओडोरस-स्तम्भ' इति । इयं तु शुङ्गनृपतेः काशीपुत्रभागभद्रस्य शासनकाले

विनिर्मिता वास्तुकृतिरस्ति । स्तम्भोपरि समुत्कीर्णेन लेखेन ज्ञायते यत् तक्षशिला वास्तव्यस्य दियस्य पुत्रो हेलिओडोरस नामा यवनाधिपतेः अन्तलिकितस्य राजदूतत्वेन वैदेशिको भवन्नपि श्रीवैष्णवधर्मस्य दीक्षां ग्रहीतवान् । अत्रत्यो गरुडशीर्षस्तम्भो हिन्दुधर्मं प्रति तस्योदारभावनां संसूचयति ।

वेत्रवत्याः समीपे विंशतिसङ्ख्यकाः गुहाः सन्ति; याः सर्वाः ''उदयगिरिगुहा'' नाम्ना प्रख्याताः वर्तन्ते । इमाः सर्वाः स्वर्णयुगस्य गुप्तकालस्य माहात्म्यगाथां प्रगायन्ति ।

विदिशातः किञ्चिद् दूरस्थे चितौरियानामके ग्रामे नवम्याः दशम्याश्च शताब्द्याः परमारकालीनाः ब्रह्मणः, विष्णोः, शिवस्य, गणेशस्यार्द्धनारीश्वरस्य प्रतिमाः दर्शनीयाः सन्ति ।

कालक्रमेणात्र जैन-बौद्धसम्प्रदाययोः विकासोऽपि समभवत् । विशेषरूपेण, गुप्तकाले चतुर्थ्यां शताब्द्यां रामगुप्ताधिशासिते जैनतीर्थङ्कराणां मूर्तिनिर्माणं, तथा च तासां प्रतिष्ठापनं गोलक्यान्त्यायाः सुपुत्रस्य चेलुक्षमणस्य, तच्छिष्यस्याचार्यसर्प्यसेनस्य च प्रेरणया कारितम् आसीत् । निकटमेव साञ्चीनगरे बौद्धसम्प्रदायस्य स्तूपो वर्तते ।

अन्ते च, सर्वेभ्यः ज्येष्ठेभ्यः सादरं प्रणामाः । अनुजेभ्यः हार्दिकः स्नेहः । मित्रेभ्यः शुभाकाङ्क्षां प्रकटीकरोमि ।

भवदीयः पुत्रः

मृदुलः

## शब्दार्थः

पूज्यपादाः - पूजनीय चरणों वाले । सश्रद्धम् - श्रद्धासहित । विदितम् - ज्ञात (जाना हुआ) । सम्प्रति - इस समय । सुष्ठुतया - ठीक प्रकार से । विगते - पिछले । सह - साथ । पुरा - पहले, प्राचीन समय में । लोकख्यातिः - लोगों में प्रसिद्ध । समुन्नतं - उन्नति को प्राप्त । प्रणीतेन - रचे गये के द्वारा । विज्ञायते - जाना जाता है । अत्र - यहाँ । अभिषिच्य - (राज्य) अभिषेक करके । अमुम् - इसको । स्वायत्तीकृतम् - अपने अधीन कर लिया । सम्प्राप्य - पहुँचकर । द्रष्टुम् - देखने के लिये । त्रिमुखिनः - तीन मुख वाले का । अप्रतिमाः - अद्वितीय (बहुवचन) । स्मारकः - स्मरण कराने वाला । अवशेषः - शेष (बाकी) बचा हुआ । अपूर्वः - अनोखा । दिशि - दिशा में । दुर्गाभ्यन्तरे - किले के बीच में । अपराभिधेयेन - दूसरे नाम से । प्रसिद्धिम् - ख्याति को । अगात् - (प्राप्त हो) गया । क्रोशम् - एक कोस । वैदेशिकः - विदेशी । ज्ञायते - जाना जाता है । गुहाः - गुफायें । प्रख्याताः - प्रसिद्ध (बहुवचन) । दर्शनीयाः - देखने योग्य । शताब्द्याः - शताब्दी (शती) की । कालक्रमेण - काल के क्रम से । प्रतिष्ठापनम् - प्रतिष्ठित करना । कारितम् - करवाया । स्तूपः - बौद्धभिक्षु का निवास स्थान । सर्वेभ्यः - सभी के लिये । अनुजेभ्यः- छोटे भाइयों के लिये । हार्दिकः - हृदय से उत्पन्न । शुभाकाङ्क्षा - शुभकामना । प्रकटीकरोमि - प्रकट करता हूँ ।

## अभ्यासः

1. **एकपदेन उत्तरं लिखत –**

(क) विद्यालयस्य शैक्षणिकं भ्रमणदलं कुत्र गतवान् ?

(ख) पूर्वस्मिन् काले विदिशानगर्याः किं नाम आसीत् ?

(ग) 'सुबाहुः' कस्य पुत्रः आसीत् ?

(घ) विदिशानगरी कस्याः नद्यास्तटे वर्तते ?

(ङ) कस्य नृपस्य शासनकाले 'हेलिओडोरस-स्तम्भः' निर्मितः आसीत् ?

2. **एकवाक्येन उत्तरं लिखत –**

(क) विदिशानगरी कस्मिन् प्रदेशे स्थिता विद्यते ?

(ख) विदिशानगरी कस्य देशस्य राजधानी आसीत् ?

(ग) विदिशामध्ये किं नाम स्मारको वर्तते ?

(घ) दुर्गाभ्यन्तरे किं स्थितम् अस्ति ?

(ङ) श्रीवैष्णवधर्मस्य दीक्षां कः ग्रहीतवान् ?

3. **अधोलिखितप्रश्नानाम् उत्तराणि लिखत –**

(क) 'भेलसा' नाम्नेयं नगरी कथं प्रसिद्धा ?

(ख) गुप्तकालस्य माहात्म्यगाथां काः प्रगायन्ति ?

(ग) विदिशानगर्याः काः प्रतिमाः दर्शनीयाः सन्ति ?

4. **प्रदत्तशब्दैः रिक्तस्थानानि पूरयत –**

(उदारभावनाम्, पुरातनकालादेव, कुशलं, ग्रहीतवान्, द्रष्टुम्)

(क) अत्र ...................... तत्राप्यस्तु।

(ख) वयं सर्वे पुरातत्त्वसङ्ग्रहालयं ................... अगच्छाम।

(ग) श्रीवैष्णवधर्मस्य दीक्षां ..........................।

(घ) हिन्दुधर्मं प्रति तस्य ........................ संसूचयति।

(ङ) नगर्याः स्थितिः ....................... विद्यते।

5. **यथायोग्यं योजयत –**

| 'अ' | 'आ' |
|---|---|
| (क) भेलसा | उदयगिरिगुहाः |
| (ख) आदिकविना | शालभञ्जिका |
| (ग) विंशतिसङ्ख्यकाःगुहाः | भेल्लस्वामिन् |
| (घ) ग्यारसपुरस्य | गुप्तकालस्य |
| (ङ) स्वर्णयुगस्य | वाल्मीकिना |